# संस्कृत-वार्ताः

दिनाङ्कः-05.05.2025 सायम् - 06:20

## आदौ मुख्यवार्ताः

- पहलगाम-आतङ्क-आक्रमणस्यालोके भारतेनु चिनाब-नद्याः बगलीहारजलबन्धात् जलप्रवाहः स्थगितः।
- सर्वोच्चन्यायालयेन ऐषमः वक्फ-संशोधन-अधिनियमस्य, संवैधानिक-वैधतायाः सम्बद्धं प्रकरणं मई पञ्चदश-दिनाङ्के अग्रिमश्रवणार्थं सूचीबद्धम् कृतमस्ति।
- इजरायल-मन्त्रिमण्डलेन गाजा-प्रदेशे हमास-विरुद्धस्य आक्रमणस्य विस्ताराय अनुमोदनं कृतम् ।
- भारतं जापानं च क्षेत्रीय-अन्ताराष्ट्रिय-सुरक्षा-स्थितेः चर्चां कुर्वन्ति ।
- भारतीय-ऋतु-विज्ञानविभागेन आगामिदिनत्रयपर्यन्तं वायव्यभारते वज्रपातस्य, झञ्झावातस्य च नारङ्गवर्णीयसंचेतना प्रसारिता ।

## अथ वार्ताः विस्तरेण

## पहलगाम-बगलिहार

पहलगाम-आतङ्कवादी-आक्रमणस्य पश्चात् पाकिस्तान-विरुद्धम् अपरस्मिन् सशक्त-पदे भारतेन चिनाब-नद्याः बगलिहार-जलबन्धेन जलस्य प्रवाहः निरुद्धः अस्ति। आकाशवाण्याः जम्मू संवाददात्रा ज्ञापितं यत् भारतेन सिन्धुनदीभ्यः समीपस्थदेशं प्रति "एकबिन्दुरपि जलं" गन्तुं नानुमन्यते इति निर्णयं अनुसृत्य, बगलीहारजलबन्धात् पाकिस्तानं प्रति जलप्रवाह:म् अवरुद्ध:। भारतेन अधुना झेलम-नद्याः किशङ्गङ्गा-जलबन्धे अपि एतादृशानाम् उपायानां योजना क्रियते । अवधेयमस्ति यत् जम्मू-सम्भागस्य रामबन-मण्डले स्थितः बगलीहार-जलविद्युत्-बन्धः, उत्तर-कश्मीरे किशनगङ्गा-जलविद्युत्-बन्धः भारताय जल-विमोचन-समय-नियमनस्य क्षमताम् यच्छत:।

## सर्वोच्चन्यायालयः-वक्फ अधिनियमः

सर्वोच्चन्यायालयेन ऐषमः वक्फ-संशोधन-अधिनियमस्य, संवैधानिक-वैधतायाः सम्बद्धं प्रकरणं मई पञ्चदश-दिनाङ्के अग्रिमश्रवणार्थं सूचीबद्धम् कृतमस्ति। अवधेयमस्ति यत् भारतस्य मुख्यन्यायाधीशः संजीव खन्ना, न्यायाधीशः संजयकुमारः, न्यायाधीशः के. वी. विश्वनाथनः इत्येतैः सम्मिलितेन संविधानपीठेन अस्य वक्फ-अधिनियमस्य संवैधानिकवैधतां विरुद्ध्य कृत-याचिकानां समूहस्य श्रवणं क्रियते स्म । श्रवणकाले मुख्यन्यायाधीशः खन्ना अवदत् यत् - पीठेन प्रतिशपथपत्रं प्रति बहु गभीरेण नाभिगता। तेनोक्तं यत् सः एतत् विषयं अग्रिमस्य मुख्यन्यायाधीशस्य न्यायाधीश-भूषणरामकृष्ण-गवई इत्यस्य पीठे स्थापयिष्यति, यश्च मई चतुर्दश-दिनाङ्के कार्यभारं स्वीकुर्यात्। खन्ना-वर्येण उक्तं यत् सः, न्यायाधीश-गवई इत्यस्मै विषय-प्रवेशाय किञ्चित् समयं दातुम् इच्छति।

**इजरायलस्य मन्त्रिमण्डलम् गाजा:**

इजरायल-मन्त्रिमण्डलेन गाजा-प्रदेशे हमास-विरुद्धस्य आक्रमणस्य विस्ताराय अनुमोदनं कृतम्, यत्र भूमौ अधिग्रहणं, हमासस्य सहायतानियन्त्रणं अवरुद्ध्य करिष्यमाण-प्रयत्नाः च अन्तर्भवन्ति। अमेरिकीराष्ट्रपति ट्रम्पस्य आगामिसप्ताहे भ्रमणानन्तरम् आक्रमणं आरभ्यते । अत्रान्तरे युद्धविरामस्य, बन्धकविमोचनस्य च वार्ता निरन्तरं भविष्यति।

**भारत-जापान:**

रक्षामन्त्री राजनाथसिंहः सम्प्रति नवदिल्लीनगरे स्वस्य जपानदेशस्य समकक्षीयेन जनरल् नकाटानी इत्यनेन सह द्विपक्षीयसमागमं करोति। श्रीराजनाथसिंहः स्वस्य उद्घाटनभाषणे पहलगाम-आतङ्कवादी-आक्रमणस्यालोके भारतेन सह एकस्वरेण दृढाभिव्यक्तये जापान-सर्वकाराय धन्यवादं दत्तवान्। भारत-जापान-रक्षासम्बन्धस्य सुदृढीकरणाय जनरल् नकाटानी इत्यस्य अपार-योगदानस्य प्रशंसाम् अपि अकरोत् ।

उभयपक्षः वर्तमानक्षेत्रीय-अन्ताराष्ट्रिय-सुरक्षा-स्थितेः विषये विचाराणाम् आदान-प्रदानं कुर्वन् अस्ति, द्विपक्षीय-रक्षा-सहकार्यं अधिकं गभीरं कर्तुं च उपायान् चर्चयति ।

**भारत- रूस:**

रशिया राष्ट्रपतिः व्लादिमीर् पुतिनः अद्य प्रधानमन्त्रिणा नरेन्द्रमोदिना सह वार्तालापं कृत्वा भारतस्य पहलगाम् इत्यत्र आतङ्कवादीनां आक्रमणस्य कठोरनिन्दां कृतवान्। दूरभाषेण वार्तालापकाले राष्ट्रपतिना पुटिनेन, निर्दोषाणां प्राणहानिविषये गभीराः

शोकसंवेदनाः प्रकटिताः तथा, आतङ्कवाद-विरुद्ध-युद्धे भारतस्य पूर्णसमर्थनं च प्रकटितम्। सः जघन्यस्य आक्रमणस्य अपराधिनः, तेषां समर्थकाः च न्यायालये आनेतव्याः इत्यवोचत्। विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जयसवालः सामाजिकमाध्यम-पटले अलिखत् यत् वार्तालापकाले उभौ नेतारौ भारतस्य रशियादेशस्य च मध्ये विशेष-विशेषाधिकारयुक्तं सामरिक-सहयोगम्, अधिकं गभीरं कर्तुं स्वप्रतिबद्धतां पुनरुक्तवन्तौ। प्रधानमन्त्री मोदी, अशीतितमं वार्षिक-विजयदिवसमुद्दिश्य राष्ट्रपतिपुटिन् इत्यस्मै अभिनन्दनं कृतवान् तथा च इतःपरं भारते आयोजयिष्यमाणा-वार्षिकशिखरसम्मेलनाय आमन्त्रितवान्।

## मोदी-रक्षासचिवः

पहलगाम-आतंकि-आक्रमणस्यालोके रक्षासचिवः राजेशकुमारसिंहः अद्य प्रधानमन्त्रिणं श्रीनरेन्द्रमोदिनं नवदिल्लीनगरस्य तस्य निवासस्थाने सम्पर्कं कृतवान्। ह्यः वायुसेनाप्रमुखः एयर चीफ मार्शल अमरप्रीतसिंहः श्रीमोदिना सह मिलितवान् आसीत्। प्रधानमन्त्रिणः एड्मिरल् दिनेश-के-त्रिपाठी इति नौसेनाप्रमुखस्य तथा भूसेनाप्रमुखस्य जनरल उपेन्द्र द्विवेदी इत्याभ्यां सहापि पृथक् पृथक् सभाः अभवन्।

## UIDAI-नीट्

द युनिक आइडेण्टिफिकेशन् अथोरिटी आफ् इण्डिया इति भारतीय-अद्वितीय-परिचय-प्राधिकरणेन, रविवासरे, नवदिल्लीनगरे, ऐषमः नीट् परीक्षायाः समये आधाराधारित-मुखप्रमाणीकरणस्य उपयोगेन अवधारणायाः प्रमाणं सफलतया कृतम्। राष्ट्रियपरीक्षणसंस्थायाः राष्ट्रियसूचनाविज्ञानकेन्द्रस्य च सहयोगेन कृतस्यास्य उपक्रमस्य उद्देश्यं, बृहत्परिमाणेषु परीक्षासु बायोमेट्रिक-परिचयसत्यापनस्य आकलनं वर्तते।

## भाजपा-काङ्ग्रेस:

पहलगाम-आतङ्कवादी-आक्रमणस्य विषये कांग्रेसदलस्य नेत्रा अजयरायेण सर्वकारस्य विरुद्धं कथितानां आपत्तिजनक-टिप्पणीनाम् अनन्तरं भाजपा-दलम् अद्य काङ्ग्रेस-दलं प्रति आरोपाघातम् अकरोत् । नवदिल्लीनगरे, सञ्चारमाध्यमान् ज्ञापयन् भाजपादलस्य प्रवक्ता सुधांशुत्रिवेदी अवदत्, यदेकत्र, पाकिस्तानदेशः सीमायां युद्धविरामसन्धे-रुल्लङ्घनं कुर्वन् अस्ति, अथापरत्र काङ्ग्रेस-दलस्य इण्डीति घटबन्धनस्य नेतारश्च सेनाम् अभिलक्ष्य वक्तव्यं यच्छन्ति।

## गडकरी-तेलङ्गाना

केन्द्रीय मार्गपरिवहन-राजमार्गमन्त्री नितिनगडकरी अद्य तेलंगानाराज्यस्य सिरपुर-कागजनगरे नवशतोत्तर-त्रिसहस्रम्, कोटिरूप्यकाणां बहुविध-मार्गपरियोजनानां आधारशिलाम् स्थापितवान् अथ बहुविधपरियोजनानि राष्ट्राय समर्पितवान् । अस्मिन् अवसरे वदन् श्री-गडकरी राज्ये मार्गसंरचनानां सुदृढीकरणाय केन्द्रस्य प्रतिबद्धतां पुनः पुष्टिं कृतवान् ।

मन्त्री अवदत् यत्, न्यू ग्रीन-एक्सप्रेस् राजमार्गस्य इन्दौर-हैदराबाद-कारिडार् इति मार्गं आगामिवर्षस्य मार्चमासपर्यन्तं सम्पन्नः भविष्यति, तदनन्तरं सूरत-नासिक-कुर्नूल-हैदराबाद-चेन्नै-तिरुवनन्तपुरम् ग्रीनफील्ड् राजमार्गः अग्रिम-वर्षस्य अप्रैल-मासपर्यन्तं संपूर्णः भविष्यति।

## भारतीय-ऋतु-विज्ञान-विभागः

भारतीय-ऋतु-विज्ञानविभागेन आगामिदिनत्रयपर्यन्तं वायव्यभारते वज्रपातस्य, झञ्झावातस्य च नारङ्गवर्णीयसंचेतना प्रसारिता। विभागेन गुरुवासरपर्यन्तं ओडिशा-पश्चिमबङ्ग-झारखण्डयोः उपरि वज्रपातः, विद्युत्-वायुः, झञ्झावातश्च भविष्यतीत्यपि पूर्वानुमानं कृतम् । दक्षिणभारते अपि सम्पूर्णसप्ताहं यावत् एतादृशी स्थितिः अपेक्षिता अस्ति।

## आईपीएल-क्रिकेट्-क्रीडा

आईपीएल-क्रिकेट्-क्रीडायाम् अद्य सायंकाले सनराइजर्-हैदराबाद दलं दिल्ली-कैपिटल्स्-दलेन सह क्रीडिष्यति । क्रीडैषा सायं सार्धसप्तवादने आरप्स्यते । ह्यः धर्मशालायाः हिमाचलप्रदेशक्रिकेटसङ्घस्य क्रीडाङ्गणे पञ्जाबकिङ्ग्स् दलेन लखनऊ-सुपर-जाइन्ट्स् इति दलं सप्तत्रिंशत् धावनांकै: पराभूतम् ।